# माँ भुवनेश्वरी कवच

ह्रीं बीजं मे शिरः पातु भुवनेश्वरी ललाटकम् ।

ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनम् ।।

श्रीं पातु दक्षकणर्ण मे त्रिवर्णात्मा महेश्वरी ।

वामकर्ण सदा पातु ऐं घ्राणं पातु मे सदा ।।

ह्रीं पातु वदनं देवी ऐं पातु रसनां मम ।

श्रीं स्कन्धौ पातु नियतं ह्रीं भुजौ पातु सर्वदा ।।

क्लीं करौ त्रिपुरेशानी त्रिपुरैश्वर्यदायिनी।।

ॐ पातु हृदयं ह्रीं मे मध्यदेशं सदाऽवतु ।

क्री पातु नाभिदेशं सा त्र्यक्षरी भुवनेश्वरी ।।

सर्वबीजप्रदा पृष्ठं पातु सर्ववशंकरी ।

ह्रीं पातु गुदे शं मे नमो भगवती कटिम् ।।

माहेश्वरी सदा पातु सक्थिनी जानुयुग्मकम् ।

अन्नपूर्णा सदा पातु स्वाहा पातु पदद्वयम् ।।

सप्तदशाक्षरी पायाद्न्नपूर्णात्मिका परा ।

तारं माया रमा काम: षोडशार्णा तत: परम् ।।

शिरस्स्था सर्वदा पातु विंशत्यर्नात्मिका परा ।

तारदुर्गे युगं रक्षिणी स्वाहेति दशाक्षरी ।।

जयदुर्गा धनश्यामा पातु मां पूर्वतो मुदा ।

मायावीजादिका चैषा दशार्णा च परा तथा ।।

उत्तप्तकांचनाभासा जयदुर्गाननेऽवतु ।

तारं ह्रीं दुं दुर्गायै नमोऽष्टार्णात्मिका परा ।।

शंखचक्रधनुर्बाणधरा मां दक्षिणेऽवतु ।

महिषामर्दिनी स्वाहा वसुवर्णात्मिका परा ।।

नैर्ऋत्यां सर्वदा पातु महिषासुरनाशिनी ।

माया पद्धावती स्वाहा सप्तार्णा परिकीर्तिता ।।

पद्धावती पद्धसंस्था पश्चिमे मां सदावतु ।

पाशानकुशपुटा माये हि परमेश्वरि स्वाहा ।।

त्रयोदशार्णा भुवनेश्वरीधया अश्वारुढ़ाननेवतु ।

सरस्वती पञ्चशरे नित्यक्लिन्ने मदद्रवे ।।

स्वाहा रव्यक्षरी विद्या मामुत्तरे सदावतु ।

तारं माया तु कवचं खं रक्षेत् सदा वधूः ।।

हूँ क्षे फट् महाविद्या द्वाद्शार्णाखिलप्रदा ।

त्वरिताष्टाहिभिः पायाच्छिवकोणे सदा च माम् ।।

ऐं क्लीं सौः सा ततो वाला मामूधर्वदेशतोऽवतु ।

बिन्द्वन्ता भैरवी बाला भूमौ च मां सदावतु ।।